# Shri Mahaganapati Stotra Panchakam

# શ્રીમહાગણપતિસ્તોત્રપઞ્ચકમ્

## Document Information

```
Text title : Mahaganapati Stotra Panchakam
File name : mahAgaNapatistotrapanchakam.itx
Category : ganesha, panchaka
Location : doc_ganesha
Proofread by : Sivakumar Thyagarajan
Description/comments : Stotrasamuccaya Volume 1 2
Latest update : October 3, 2021
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 3, 2022

*sanskritdocuments.org*

# શ્રીમહાગણપતિસ્તોત્રપઞ્ચકમ્

ૐ શ્રીગણેશાય નમઃ ।
વન્દે સિન્દૂરકાન્તિં મદયુતકરટપ્રાન્તસમ્ભ્રાન્તભૃઙ્ગ-
ધ્વાનૈરાપૂરિતાશામુખમચલસુતાહ્લાદપાર્થાધિવિચન્દ્રમ્ ।
શુણ્ડાકાણ્ડે સમુદ્રાન્ સુમણિગણયુતાન્ લીલયાપૂર્ય લોકે
દિવ્યે ભૌમ્યે કિરન્તં ગજવરવદનં શોણશૈલેન્દ્રસૂનુમ્ ॥ ૧॥

વન્દે દન્તેન મેરૌ વિધુકુલનૃભુજાં કૌરવાણાં ચરિત્રં
વ્યાસોક્તં ભારતાખ્યં સકલવૃષયુતં સંલિખન્તં દ્વિપાસ્યમ્ ।
શુણ્ડાદણ્ડેન ભિત્ત્વા કુલધરનિવહં કન્દુકીકૃત્ય બાલ્યે
વ્યોમ્નો માર્ગે ક્ષિપન્તં ક્ષિતિવરતનયાશોણશૈલેન્દ્રસૂનુમ્ ॥ ૨॥

ચન્દે દન્તાવલાસ્યં દશનજપસરૌ લડ્ડુકં સત્કુઠારં
હસ્તૈરત્યદ્ભુતામ્ભોરુહવરસદૃશૈઃ સન્દધાનં ગણેશમ્ ।
આરુહ્યાખું મહાન્તં અમરરિપુગણૈરઙ્કુશાગ્રેણ યુદ્ધે
હન્તારં હસ્તિવક્ત્રૈર્ગજમુખદનુજં શોણશૈલેન્દ્રસૂનુમ્ ॥ ૩॥

વન્દે સન્તાપશાન્ત્યૈ સકલમુનિજનૈઃ સામઋઙ્મુખ્યવેદા-
નધ્યેતું મુક્તિવાઞ્છાપ્રદફલસહિતાન્ વન્દિતં વિઘ્નરાજમ્ ।
ભક્તાનામન્તરાયાઞ્છિરસિકૃતમહાડિણ્ડિમાડમ્બરેણા-
મુષ્ણન્તં વર્ષ્મભાસા જિતઘનમનઘં શોણશૈલેન્દ્રસૂનુમ્ ॥ ૪॥

કૈલાસે કમનીયરત્નખચિતે સૈંહે સ્થિતં વિષ્ટરે
શમ્ભું સર્વચરાચરાત્મકજગદ્રૂપં પ્રણત્વા ફલમ્ ।
ચૂતં તત્કરસંસ્થિતં રસયુતં સ્કન્દાગતેઃ પ્રાઙ્ મુદા
ચર્વન્તં પરિગૃહ્ય કુઞ્જરમુખં વન્દામહે શાઙ્કરમ્ ॥ ૫॥

ઇતિ શ્રીમહાગણપતિસ્તોત્રપઞ્ચકં સમાપ્તમ્ ।

This stotra, shrI

mahAgaNapatistotrapa nchaka,  might have
been composed by one resident in or near the
famous shrine of tiruvaNNAmalai (aruNAchalA),
as there is reference to this sacred place
in the refrain (shoNashailendrasUnuM).

Proofread by Sivakumar Thyagararajan

---

*Shri Mahaganapati Stotra Panchakam*
pdf was typeset on December 3, 2022

Please send corrections to *sanskrit@cheerful.com*